दिनाङ्क :-29.04.2026

प्रात: - 06:55

## पश्चिम-बंगाल-निर्वाचनम्

पश्चिम-बंगाले द्वितीयाय अन्तिमाय च चरणाय मतदानम् अद्य। अद्य विधानसभानिर्वाचनस्य द्वितीयचरणाय मतदानं समारभेत्। सप्तजनपदानां द्विचत्वारिंशदुत्तर - शतम् आसन्देषु-मतदानं स्यात्। पश्चिम बंगाले विधानसभानिर्वाचनस्य द्वितीयचरणाय सप्तजनपदेषु चत्वारिंशत्सहस्त्राधिकानि मतदानकेन्द्राणि स्थापितानि। अत्र अष्टचत्वारिंशदुत्तर -चतु:शताधिक-सहस्त्राधिका: प्रत्याशिन:समुपस्थिता: यत्र विंशत्युत्तर- द्विशतं महिला-प्रत्याशिन्य: सम्मिलिता: सन्ति। मतदानं प्रात: सप्तवादनत: सायं षट्वादन-पर्यन्तं प्रचाल्येत्। अवधेयं यत् पश्चिमबंगाले प्रथमचरणे त्रिणवति-प्रतिशन्मितादधिकं मतदानं समंकितम् आसीत्। मतगणना मे मासस्य चतुर्थे दिनांके भविष्यति।

## प्रधानमन्त्री-उत्तरप्रदेशाय यात्रा

प्रधानमन्त्री नरेन्द्रमोदी उत्तरप्रदेशस्य द्विदिवसीययात्रायां प्रवर्तमान:। श्री मोदी अद्य प्रात: वाराणस्या: श्रीकाशीविश्वनाथ-मन्दिरे दर्शनं अर्चनां च विदध्यात्। एतदनन्तरं प्रधानमन्त्री हरदोई इतयत्र गच्छेत्, अद्य 'गंगा एक्सप्रेसवे' इत्येतस्य उद्घाटनं कुर्यात्। प्रधानमन्त्री उत्तरपद्रेशे-एक्सप्रेसवे इत्यत: श्रीकाशीविश्वनाथमंदिर-पर्यन्तं मार्गीय-यात्रां अपि कुर्यात्, यत्र जनै: सह सम्वादमपि कुर्यात्। एषा मार्गीय यात्रा वाराणस्या: नैकेषु महत्वपूर्णस्थलेषु भवेत्। एतत्पूर्वं प्रधानमन्त्री नरेन्द्रमोदी वाराणस्यां महिला-सम्मेलनं

विशाल-जनसभां सम्बोधितवान्। श्रीमोदी सबलं प्रतिपादितवान् यत् महत्वपूर्ण प्रकरणेषु निर्णयस्वीकरणाय महिलानां भूमिका देशे अतीव महत्वपूर्णा। श्री मोदी विपक्षिदलानि कट्वालोचयन् प्रतिपादितवान् यत् विपक्षिदलैः नारी-शक्ति-वंदन-विधेयकस्य समर्थनं न कृतम्, महिलाविरोधिरूपाणि देशे विपक्षिदलानि।

## प्रधानमन्त्री-सिक्किम

प्रधानमन्त्री नरेन्द्रमोदी अद्य गङ्गटोक-नगरस्य पालजोर-क्रीडाङ्गणे चतुः सहस्र-कोटि-रूप्यकाणां बहुविधविकास-परियोजनानां उद्घाटनम्, शिलान्यासं च कृतवान्। सः पूर्वोत्तरक्षेत्राणां कृते षट् क्रिकेट्-अकादमीनाम् घोषणाम् अपि अकरोत्। सिक्किम्-राज्यस्य पञ्चाशत्तमस्य राज्योत्सवस्य समापनसमारोहे सः परियोजनानां उद्घाटनम् अकरोत्। जनसमूहं सम्बोधयन्, श्रीमोदी पूर्वोत्तरं भारतस्य "अष्टलक्ष्मी" इति वर्णितवान् तथा च "ऐक्ट् ईस्ट्, ऐक्ट् फास्ट्" इत्यस्य प्रशासकीय-संकल्पस्य उपरि अवधानं प्रदत्तवान्।

## गुजरात-निर्वाचनम्

भारतीय-जनता-पार्टी इत्येतेन दलेन गुजरातप्रदेशे स्थानीय-निकाय-निर्वाचनेषु अभूतपूर्वः विजयः सम्प्राप्तः, एतेन सह भाजपादलेन राज्यस्य प्रमुखेषु नगर-निगमेषु विजयः प्राप्तः। द्विशताधिक-नवसहस्त्रं-आसन्देषु भाजपादनलेन सार्धसप्तसहस्त्राधिकानि विजितानि। प्रधानमन्त्री मोदी भाजपादलस्य वरिष्ठाः नेतारश्च राज्ये महानगरपालिका-नगरपालिका-तालुका पंचायत-जनपदपंचायत-निर्वाचनेषु विजयमभिलक्ष्य गुजरातस्य जनान् प्रति आभारं प्रकटितवन्तः।

संचारतन्त्रपटले श्री मोदी ख्यापितवान् यत् अद्य निर्णयेषु स्पष्टं यत् गुजरात-भाजपादलस्य सम्बन्धः अतीव विशिष्टः।

## आईपीएल

आईपीएल इत्येतस्यां क्रिकेट्लीगप्रतिस्पर्धायां गतरात्रौ न्यूचण्डीगढ-क्रीडांगणे समायोजिते द्वन्द्वे राजस्थान-रॉयल्स इत्येतेन दलेन पंजाबकिंग्स इति दलं पट्स्तोभ पुरस्सरं पराजितम्। द्वन्द्वे प्रथमं दण्डेन क्रीडयता पंजाबकिंग्स इतयेतेन दलेन द्वाविंशतयुत्तर- द्विशतं धवनांकाः समर्जिताः प्रत्युत्तरे राजस्थान-रॉयल्स इत्येतेन दलेन सहजतया लक्ष्यं समधिगतम प्रतिस्पर्धयाम् अद्य मुम्बईनगरस्य वानखेडे क्रीडांगणे मुम्बई इण्डियन्स- सनराइजर्स हैदराबाद इत्येतयोः दलयोः मध्ये द्वन्द्वं स्यात्। स्पर्धाएषा भारतीयसमायानुसारं सायं सार्धसप्तवादेन समारभेत्।